Vol.: 17 (January–June 2020)

ISSN No. : 2277-4270
UGC List No. - 40768

# आम्नायिकी



सप्तदशोऽङ्कः, जनवरी-जून, २०२०
षाण्मासिकी अन्ताराष्ट्रिया मूल्याङ्कितशोधपत्रिका
(विश्वविद्यालयानुदानायोग-नईदिल्लीद्वारा अनुमोदिता)

प्रधानसम्पादकः
प्रोफेसरहरीश्वरदीक्षितः

सहसम्पादकाः
प्रोफेसरपतञ्जलिमिश्रः डॉ० उदयप्रतापभारती, डॉ० सरोजकुमारपाढी,
डॉ० पुष्पादीक्षितः, डॉ० रमाकान्तपाण्डेयः, प्रो० (डॉ.) देवेन्द्रनाथपाण्डेयः,
डॉ० राकेशकुमारमिश्रः, डॉ० आलोकप्रतापसिंहविसेनः

प्रकाशकः
प्रोफेसरहरीश्वरदीक्षितः
वेदविभागः
संस्कृतविद्याधर्मविज्ञानसङ्कायः
काशीहिन्दूविश्वविद्यालयः, वाराणसी- २२१००५

Scanned with CamScanner

| | | |
|---|---|---|
| २०. | हिन्दी नाटकों में स्त्री चेतना<br>**डॉ0 कुमारी विभा** | ९९-१०१ |
| २१. | बौद्ध दर्शन में मानववादी अवधारणा<br>**कुमारी सोनम** | १०२-१०७ |
| २२. | बुद्धिवादी सर्किट में पर्यटन का विकास : बिहार के सन्दर्भ में एक भौगोलिक अध्ययन<br>**साधना कुमारी** | १०८-११२ |
| २३. | दामोदर नदी बेसिन (झारखण्ड) में पारिस्थितिकी पर्यटन की मुख्य धरोहर : एक भौगोलिक अध्ययन<br>**मीरा ठाकुर** | ११३-१२७ |
| 24. | सामाजिक तनाव का कृषि एवं आर्थिक विकास पर प्रभाव : जहानाबाद बिहार के संदर्भ में एक भौगोलिक अध्ययन<br>**मनोज कुमार निराला** | १२८-१३३ |
| 25. | जैन धर्म में संवर का स्वरूप<br>**अर्चना कुमारी** | १३४-१३६ |
| 26. | सगुण और निर्गुण के स्वरूप का दार्शनिक विवेचन<br>**रजनीश कुमार** | १३७-१४० |
| 27. | आचार्यजयमन्तमिश्रस्य परिचयः<br>**गायत्री** | १४१-१४३ |
| 28. | ज्योतिषशास्त्रस्योपयोगिता<br>**डॉ0 मैथली कुमारी** | १४४-१४८ |
| 29. | शब्देनैव सृष्टि प्रक्रिया<br>**डॉ0 मिन्टू कुमारी** | १४९-१५२ |
| 30. | ज्योतिषशास्त्र में योगों की उपादेयता<br>**पुनीता गुप्ता** | १५३-१६२ |
| 31. | सब धर्मों का सार है ईश्वर की भक्ति<br>**डॉ0 राजदीप कुमार** | १६३-१६६ |
| 32. | भारतीय दर्शन में 'काल' की अवधारणा<br>**डॉ0 आभा द्विवेदी** | १६७-१७३ |
| 33. | वैदिकं विज्ञानम्<br>**कृष्ण मुरारी त्रिपाठी** | १७४-१७८ |
| 34. | COSMO-METAPHYSICAL CONSIDERATIONS IN ĀYURVEDA<br>**Dr. Dnyaneshwar J. Deshatwar** | १७९-१८५ |
| 35. | Feminism in Stone Angle of Margret Lawrence<br>**Anand Kumar Thakur** | १८६-१८० |
| 36. | Will Covid- 19 spell the End of Outdoor and Environment Education<br>**Dr. Kumari Smita** | १८१-१८५ |
| 37. | Education, Research and Emerging Dimensions of Accounting in India<br>**Amit Kumar** | १८६-१९३ |
| 38. | Studies on seasonal variations (Specially Photoperiod) in. Bio chemical composition and colorific value of Anabas testudineus (Bloch)<br>**Bitun Kumar Ray and Vijay Kumar** | १९४-१९६ |
| 39. | The reduced methaemoglobin levels works as an adaptive mechanisms in Sevin exposed obligate air breathing fish A. testudineous (Bloch)<br>**Tulika Das and Vijay Kumar** | १९७-२०० |

Scanned with CamScanner

Vol.: 17
(January–June 2020)

आम्नायिकी
ĀMNĀYIKĪ

ISSN No. : 2277-4270
UGC List No. - 40768

# विषयानुक्रमणिका


| क्रमः | विषयः | पृष्ठ सं० |
|---|---|---|
| १. | उपनिषत्सु प्राणतत्त्वविमर्शः<br>**प्रो० कृष्णाकान्तशर्मा** | ०१-०४ |
| २. | वैदिकवाङ्मये वैज्ञानिकचिन्तनम्<br>**प्रो० हरीश्वरदीक्षितः** | ०५-०९ |
| ३. | उपनिषदि शिवशक्तिविमर्शः<br>**प्रो० महेन्द्र पाण्डेय** | १०-१२ |
| ४. | वेदों में पर्यावरण शोधकतत्व<br>**डॉ० पुष्पा दीक्षित** | १३-१६ |
| ५. | बौद्धदर्शन में आत्मतत्त्व-विमर्श<br>**डॉ० लक्ष्मी मिश्रा** | १७-२२ |
| ६. | वैदिक ऋषियों की मनीषा -ओषधिविज्ञान के आलोक में<br>**डॉ० अनीता सेनगुप्ता** | २३-२७ |
| ७. | लग्न साधन<br>**मनोरमा कुमारी** | २८-३२ |
| ८. | गुप्तकालीन प्रशासन में लोकतांत्रिक तत्व<br>**डॉ० सीमा मिश्रा** | ३३-३९ |
| १०. | कशमीर शैवदर्शन में सदाशिव तत्त्व और ईश्वर तत्व का विवेचन<br>**डॉ० वाहिद नसरू** | ४०-४७ |
| ११. | अनामिका : स्त्री अस्मिता का स्वर<br>**डॉ० गौरी त्रिपाठी** | ४८-५४ |
| १२. | बाल साहित्य के सरोकार<br>**आरती पाल** | ५५-६३ |
| १३. | शब्दशक्तिविवेचनम्<br>**मुरारी कुमार मिश्रः** | ६४-७० |
| १४. | समासे व्यपेक्षाविमर्शः<br>**डॉ० प्रभाकर मिश्रः** | ७१-७४ |
| १५. | वैदिकवाङ्मयदिशा जीवोत्पत्तिविमर्शः<br>**पुनीतकुमारझाः** | ७५-८० |
| १६. | चतुर्षु वेदेषु प्राप्त पुरुषसूक्तस्यार्थिक विमर्शः<br>**निशान्त मिश्रः** | ८१-८३ |
| १७. | राष्ट्रीय शिक्षा प्रणाली<br>**डॉ० बंकटेश्वर नाथ** | ८४-८७ |
| १८. | प्रकृतियज्ञस्तस्य प्रकृतित्वं विकृतित्वञ्च<br>**डॉ० इन्द्रेश कुमार झा** | ८८-९४ |
| १९. | वास्तुविचारः<br>**डॉ० राघवेन्द्रमिश्रः** | ९५-९८ |


Scanned with CamScanner

# वैदिकं विज्ञानम्

*कृष्ण मुरारी त्रिपाठी**

वेदोनाम ज्ञानम्, तस्यैव विविधं रूपं विज्ञानमुच्यते, ज्ञानन्तु ''सत्य ज्ञानमनन्तं ब्रह्म'' इत्युक्त्या एकं सत्यस्वरूपं ब्रह्माख्यञ्च विद्यते, पुनस्तस्यैव निर्विशेषस्य ब्रह्मणः सविशेषरूपेण नानात्वं ज्ञानस्यैव वैविध्यं रूपं विज्ञानपदेनाभिधीयते। शब्दान्तरेणेदं वक्तुं शक्यते यत् एकस्यैव ज्ञानस्य अनेकभवनं विज्ञानं, तथा अनेकरूपस्य विज्ञानस्य एकस्मिन् स्वरूपे=वस्थानं ज्ञानमुच्यते। वेदेषु ज्ञानस्य यद् वैविध्यं स्वरूपमुपलभ्यते तदेवात्र समासेन वैदिकं विज्ञान वक्तुं शक्यते।

'धर्मब्रह्मणी वेदैकवेद्ये' इति सायणोक्तेः वेदस्य परमं प्रतिपाद्यं धर्मो ब्रह्म चेति द्वयमेव, तत्र धर्मो यागादिः स चानेकविधः ब्रह्म च केवलमेकमेव सत्यं ज्ञान स्वरूपञ्चेति, अत एव भारतीयदर्शनेषु द्वयमेवेदं जिज्ञास्यते, अथातो धर्मजिज्ञासा' अथातो ब्रह्मजिज्ञासा इति पूर्वोत्तरमीमांसयोः सूत्राभ्यातिमति। तत्र किमिदं विज्ञानामिति जिज्ञासायामुच्यते यत्र विभित्रेषु जागतिकपदार्थेषु मूलान्वेषणक्रमेण निर्विशेषं ब्रह्माख्यमेकं नित्यं सनातनं च यत्तत्त्वमधिगम्यते तदेव ज्ञानमुच्यते, तस्यैवैकतत्त्वस्य ब्रह्माख्यस्य अनन्तरूपतापत्ति-र्विज्ञानमुच्यते, तच्च व्यावहारोपयोगि धर्मरूपम्। अत एव गीतायां भगवता कृष्णेन सात्विकं ज्ञानमुपदिष्टम्, तद्यथा-

**सर्वभूतेषु येनैकं भावमव्ययमीक्षते।**
**अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकाम् ।।** [१]

अत एतावता इदं वक्तुं शक्यते, यज्जगतो मूलान्वेषणपरं ब्रह्माख्यमेकतत्त्वात्मकं ज्ञानं मोक्षोपयोगि जायते, तथा तस्यैवानेकरूपो धर्मस्तु व्यवहारोपयोगी जायते इति बुद्धया क्वचित् व्यवहारोपयोगिनि ज्ञाने=पि विज्ञानशब्दः प्रयुज्यते, अनेनैवाभिप्रायेण भगवान् वासुदेवः गीतायां श्रीमद्भागवते च ज्ञानविज्ञानयोः समानाधिगमनं सहानुष्ठानञ्च वारं वारं ब्रूते। तद्यथा-

**ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।**
**यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।।** [२]
**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।**
**ज्ञानं विज्ञानसहितं यज्ञात्वा मोक्ष्यसे=शुभात्।।** [३]

श्रीमद्भगवते च-

**ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम्।**
**सरहस्यं तदङ्गं च गृहाण गदितो मया।।**

---

* शोधच्छात्रः, वेदविभागः, संस्कृतविद्याधर्मविज्ञानसंकायः, काशीहिन्दूविशविद्यालयः



Scanned with CamScanner

**यावानहं यथाभावो यद्रूपगुण कर्मकः।**
**तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ।।**[४]

पुनश्च- **ज्ञानविज्ञानसंसिद्धा;पदं श्रेष्ठं विदुर्मम।**
**ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति माम्।**
**ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः।।**
**ज्ञानविज्ञानयज्ञेन मामिष्ट्वाऽऽत्मानमात्मनि।**
**सर्वं यज्ञपतिं मां वै संसिद्धिं मनुयोऽगमन् ।।**[५]

वैदिकं विज्ञानं वस्तुतः धर्मतत्त्वं मोक्षतत्त्वञ्चाधारीकृत प्रवर्तते, प्रवर्तनमपि सर्वजगत्कारणान्वेषणपरं 'मूले मूलाभावादमूलमूलम्'[६] इति सांख्यसिद्धान्तनुगतं ब्रह्माख्यं केवलमेकं तत्त्वमन्ततः समुद्भास-यति, एतावता वैदिकं सर्वमति ज्ञानं धर्मविज्ञानं ब्रह्मविज्ञानञ्चेति व्यपदेष्टुं शक्यते। धर्मब्रह्माङ्गभावेनैव सर्वं वस्तुतत्त्वं कात्स्न्र्येन वेदेषु समाम्नातमिति विज्ञापयितुं शक्यते।

तदिदं वैदिकं वेदमन्त्रेषु संकेतविधया सूक्ष्मतरं समुपदिष्टमवलोक्यते, तद्यथा-देवतास्तुतिपरेषु मन्त्रेषु केनचित् विशेषणेन तत्संबन्धि गभीरं विज्ञानं विद्योत्यते, तदेवात्र किञ्चित् संक्षेपेण प्रदर्श्यते, तत्र ऋग्वेदस्य प्राथमिको मन्त्रः सर्वप्रथमं विवेचनायात्रोदाह्रियते-

**अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।**
**होतारं रत्नधातमम् ।**[७]

अत्र विश्वामित्रपुत्रो मधुच्छन्दो नामा ऋषिः मन्त्रेऽस्मिन् अग्नितत्वं स्नौति, **''अग्निर्वैदेवानामवमः विष्णुः परमः तपोरन्तरा सर्वेदेवाः''**[८] इति ऐतरेयब्राह्मणश्रुत्या अग्निरेव प्रथमो देवः समाम्नातः, अतस्तमेव सर्वतः प्रथमं स्तौति। अत्र पुरोहितमिति प्रथमं विशेषणं तिरोहितपदव्यावर्तकं प्रतीयते, तस्मादग्नेः द्विविधं स्वरूपमनुकल्प्यते पुरोहितरूपं तिरोहितरूपञ्चेति। अत्र प्राथमिके मन्त्रे यदग्ने पुरोहितं रूपं स्तूयते, तदेव रूपं पार्थिवपदार्थयोगेन अस्माकं पुरः स्थित इवावलोक्यते। तिरोहितं प्राणरूपेणान्तः निलीनं सर्वपदार्थानुप्रविष्टञ्च भवति, अतो नावलोक्यते लौकिकचक्षुषा, शास्त्रचक्षुषा तु तदीयं तिरोहितमपि रूपं द्रष्टुं शक्यते।

अपि चात्र 'पुरोहितम्' 'यज्ञस्य देवम्' 'ऋत्विजम्' 'होतारम्', 'रत्नधातमम्' इति पञ्च विशेषणान्यनेः दृश्यन्ते। तत्र पुरोहितमित्यनेन सर्वेषां सुरः समक्षं स्थितः पार्थिवाग्निरेव प्रस्तूयते न च आन्तरिक्ष्यो वैद्युताग्निः न च सौरो दिव्याग्निचात्र स्तूयते, अतः वैद्युताग्नि सौराग्निञ्च व्यावृत्य पार्थिवाग्निमेव स्तोतुमत्र पुरोहितामिति प्रथमं विशेषणम्। अपि च पुरोदृश्यमानेषु सर्वविधजागतिकपदार्थेषु तत्त्वतः अग्ने व्यर्पाकत्वन्निदर्शनाय पुरोहिततिति सार्थकं विशेषणम्। यतोहि 'यत् किञ्चिद् दार्ष्टिविषयकम् अग्निकर्मैव तद्'[९] इति वचनेन दृश्यं रूपमाग्नेयं भवतीति निगमयति निरूक्ते यास्काचार्यः। आधुनिकाः वैज्ञानिका अग्नेः यद् यौगिकत्वं स्वीकुर्वन्ति तद् पार्थिवाग्नेः स्वरूपाभिप्रायेण, न तु अग्नेः तिरोहितस्वरूपाभिप्रायेणेति प्रतीमः।



Scanned with CamScanner

वैदिकविचारधारायान्तु दाह-पाक-प्रकाश जनकोऽयं पुरोहितोऽग्निः सञ्जायते, तिरोहितोऽनिग्नस्तु प्राणरूपेण सर्वत्रावस्थितः जगद्धारकः कारकश्चावगम्यते। तस्य तिरोहिताग्नेः सर्वत्रावस्थानं वेदमन्त्रेषु द्रष्टुं शक्यते। तद्यथा-

**गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम्।**
**अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः।।**[१०]
**गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् ।**
**गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि।**[११]
**अग्निर्भूम्यामोषधीस्वाग्निमापो बिभ्रत्याग्निरश्मसु।**
**अग्निरन्तः पुरूषेषु गोस्वश्वेस्वग्नयः।।**[१२]

अपि चायमेव तिरोहितोऽग्निः स्वमहिम्ना पृथिव्यां पार्थिवाग्निरूपेण अन्तरिक्षे विद्युताग्निरूपेण दिवि च सूर्यात्मना यदा पुरोहितो जायते सर्वलोकैः द्रष्टुं शक्यते। तथा च मन्त्रवर्णः-

**मूर्धा भुवो भवति नक्तामनिग्नस्ततः सूर्यो जायते प्रातरूद्यन्।**[१३]

पुनः सूर्यस्य कृते-

**यो देवभ्य आतपति यो देवानां पुरोहितः।**
**पूर्वो यो देवेभ्यो जातो नमो रूचाय ब्राह्मये।।**[१४]

सर्वत्रावस्थितः तिरोहितोऽग्निः चतुर्दशभुवनाख्येऽस्मिन् ब्रह्मण्ड- देहे प्राणात्मना हिरण्यगर्भाभिधानां लभते, अतः स एव सूर्य आत्मा जगतस्तस्थुषश्च[१५] प्राणः प्रजानामुदयत्येष सूर्यः[१६] दृशे विश्वाय सूर्यम्[१७] इत्यादि मन्त्रवर्णैः व्यपदिश्यते।

जगत्प्राणारूपोऽग्निः किं करोतीति जिज्ञासायां मन्त्रगतग्नेः द्वितीयं विशेषणं 'यज्ञस्य देवम्'' इत्यत्र विमृश्यते।

प्रतिक्षणं परिवर्तनीयेऽस्मिन् संसारे सर्वमति दृश्यमानं पदार्थजातं न कदाप्येकरूपमुपलभ्यते, आदानप्रदानरूपः प्राकृतो यज्ञोऽजस्रं प्रवर्ततेतराम्। यथा प्रदीपः प्रकाशं सर्वत्र समर्पयति तैलावयवांश्च नितरामादत्ते, एवं पृथिव्यां वृक्षाः लताश्च लोकेभ्यः फलानि पुष्पाणि च प्रयच्छन्ति भूमेरपां च रसमस्त्राददते, अनेनादानप्रदाना-परपर्यायभूतेन प्राकृतयज्ञेनैव प्रतिक्षणं जगत् परिवर्तमानं परिवर्धमानञ्चदरीदृश्यते, अनेनैव यज्ञेन सर्वोषां प्राणिनां पार्थिव-पदार्थानाञ्चोत्पत्तिः स्थितिः विनाशश्च जायते। एतादृशस्य प्राकृतयज्ञस्य देवोऽयं तिरोहितोऽग्निः वर्तते, येन प्राणिनामङ्गपोषो वृक्षादीनां पर्ण-पुष्पादिप्रसवश्च सुतरां जायते। यथाहि मन्त्रवर्णः:-

**प्रमातु प्रतरं गुह्यमिच्छन् कुमारो न वीरूधः सर्पदुर्वीः।**
**स सं न पक्वमविदच्छुचन्तं रिरिहांसं रिप उपस्थे अन्तः।**[१८]

वृक्षलतादिषु सिक्तं जलमादित्यरश्मय ऊर्ध्वमाक्रमते, अनेन प्रक्रमणेन वृक्षादीनामूर्ध्वं तिर्यक् च क्रमेण विस्तारः पर्णपुष्पफलादिरूपेण च परिणामः परिलक्ष्यते, एतत्सर्व वृक्षलतादेः मूले स्थितस्य



Scanned with CamScanner

तिरोहिताग्नेः सामर्थ्यो नैव सम्भावनीयम्। तच्च मन्त्रे सामर्थ्यं प्रतरं गुह्यं इति पदाभ्यां संकेतितं विद्यते। तच्च यथाभाष्यं व्याख्येयमस्ति।

ऋत्विजामित्यग्नेः, तृतीयं विशेषणमस्ति, अत्र ऋतुभिर्यजति संगच्छते ऋतून् यजति वा विग्रहेण फलपुष्पादिजनकत्वेन प्रसिद्धः कालाविशेष एव ऋतुशब्दार्थः। सौराग्निना सङ्गतोऽयं पार्थिवोऽग्निः ऋत्विज उच्यते, सौरस्य संवत्सररूपतामाप्तस्याग्नेरपेक्षयैव ऋतूनां नामानि प्रभवन्ति। अनेन सौराग्निनैव ऋतुविज्ञानमपि सम्भावनीयम्, यतोहि तत्तदृतुषु फलपुष्पौषधीनामुत्पत्तिकारकोऽयं पार्थिवोऽग्निरेव।

होतारमिति चतुर्थं विशेषणमग्नेः द्युलोकस्थैः देवैः सह संबधं विज्ञापयति, यतोहि पार्थिवोऽग्निरेव तत्तदेवानावहयति, समान-धर्माणामेव सहावस्थानं परस्परामन्त्रणञ्च लोकप्रसिद्धम् इति हेतोः अग्निद्वारैव तेजः प्रधानैः देवैः सहैकरुप्यमिति न तिरोहितं विदुषाम्।

अथ पञ्चमं विशेषणं रत्नधातममिति सुवर्णमणिप्रभृतीनां रत्नानामुत्पादियता अयमेव पार्थिवोऽग्निरिति भूगर्भविज्ञानं किमपि संकेतयति। तैत्तिरीयब्राह्मणे हिरण्योत्पत्तिसन्दर्भे एतद् विज्ञायते, यत् 'आपो वै वरुणस्य पत्न्य आसन्, ता अग्निमभ्यध्यायन्त ताः समभवन् तस्य रेतः परापतत् तद्धिरण्यमभवत्''[१९] इत्यनेन रसेऽग्निवीर्य संबन्धात् हिरण्योत्पत्तिरिति स्फुटं जायते, अत एवाग्नेरपरमभिधानं हिरण्यरेता' इति संस्कृतभाषायामपि प्रसिद्धमवलोक्यते, तदित्थं मन्त्रगतैः पञ्चभिर्विशेषणैः अग्नेः व्यक्ताव्यक्तं स्वरूपद्वयं समुद्भाव्य कीदृशं वैदिकं विज्ञानं वयं परिशीलयाम इति न परोक्षं वैज्ञानिकानाम्। एवमेव प्राकृतयज्ञे सृष्टिविज्ञानं, ज्योतिषविज्ञानं, कृषिविज्ञानं, गणितर्विज्ञानं, वनस्पतिविज्ञानं प्रभृत्येनकविधं विज्ञानं परिशीलयितुं शक्यते। आयुर्विज्ञानन्तु आथर्ववेदिकविज्ञानतया प्रसिद्धमेव। अथ च तैत्तिरीयोपनिषादि ब्रह्मवल्याः प्रथमेऽनुवाके परब्रह्मणः सृष्टेरुत्पत्तिर्द्रष्टुं शक्यते, तद्यथा- ''तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोराग्नि; अग्नेरापः अद्भ्यः पृथिवी, पृथिव्याओषधयः, ओषधीभ्योऽन्नम्-, अन्नात् पुरुषः।

आधुनिकविज्ञानानुसारं कालेन गतेः परिमाणं गत्या च कालपरिमाणं निरूप्यते, यतो हि परस्पराश्रित्वमुभयोरपरिहार्यं भवति, वैज्ञानिकमिदं तथ्यं प्राचीनकालत एव प्रसिद्धमासीत् तच्च ऋग्वेदीये मन्त्रे द्रष्टुं शक्यते यथा-

**द्वादशारं नहि तज्जराय ववर्ति चक्रं परिद्यामृतस्य।**
**आपुत्रा अग्ने मिथुनासो अत्र सहशतानि विंशतिश्च तस्थुः।।**[२०]

अपि च मानवीयं जीवनमन्नाश्रितं ज्ञायते, अन्नञ्च कृषिकर्मायत्तं च जायते, ऋग्वेदे कृषिप्रशंसा द्यूतनिन्दामुखेनोपदिश्यते,-

तद्यथा - **अक्षैर्मादीव्यः कृषिमित् कृषस्व।**
**वित्ते रमस्व बहु मन्यमानः।।**[२१]



Scanned with CamScanner

पुराकालेऽस्मिन् भारतवर्षे वेदेभ्य एव गणितविद्या तत्राङ्कलेखनकला च प्रसिद्धा आसीत्। संख्यालेखनस्य आधुनिकी प्रणाली वेदादेव अधिगता। यजुर्वेदीयेऽस्मिन् मन्त्रे- एका च दश च, दश च शतं च, शतं च सहस्रं च, सहस्रञ्चायुतं च, अयुतञ्च नियुतञ्च, नियुतञ्च प्रयुतञ्च, प्रयुतञ्चार्बुदञ्च, अर्बुदञ्च समुद्रश्च[१२] खरबपर्यन्तं संख्यानं द्रष्टुं शक्यते। रेखागणितीयं विज्ञानमपि वैदिकयज्ञानुष्ठानकर्मणि वेदी निर्माणावसरे भुज-आयत-कर्ण-वर्ग-वृत्रादिशब्दैः विभिन्नेषु शुल्बसूत्रेषु द्रष्टुं शक्यते।

एवमेव अथर्ववेदीय कौशिकगृह्यसूत्रे नैकविध-वनस्पतीनां नामानि प्राप्यन्ते, तत्र पलाशं, वेतसं, कोपिलं शमी, दर्भाः दूर्वा, यवाः, तिलाः प्रभृति पदार्थाः दरीदृश्यन्ते। महर्षिः पाराशरः वनस्पतिविज्ञानजनक इति स्मर्यते, तस्य प्रसिद्धो ग्रन्थः वृक्षायुर्वेदः यद्यपि सम्प्रति नोपलम्यते, तथापि तस्योद्धरणं संस्कृतसाहित्ये बहुत्र प्राप्यते।

किं बहुना धर्म-ब्रह्म चेति वैदिंक प्रतिपाद्यद्वयमिति प्रतिज्ञात सिद्धान्ते ज्ञानापरपर्याभूतान् ब्रह्मणोऽतिरिक्तात् धर्म पदेनैव विविधं विज्ञानं प्रत्येतव्यं भवति। सम्प्रति आधुनिकं विज्ञानमति तदेव वस्तुतथ्यमुपस्थापयति, यत् पुरा वेदेषु धर्मवैविध्येनाम्रातमासीदितिदिक्।

**सन्दर्भ :**


१. गी. १८/३
२. गी. ७/२
३. गी. १/१
४. भा. २/९/३०-३१
५. भा. ११/११/४-५-६
६. सांख्य सूत्र १/३२
७. ऋग्वेद – १-१-१
८. ऐतरेय ब्राह्मण १/१/१
९. निरुक्त ७/३
१०. ऋ. १/७०/२
११. यजु. १२/३७
१२. अथर्ववेद १२/१/११
१३. ऋ. १०/८८/६
१४. यजु. ३१/२०
१५. यजु. १३/४६
१६. ऋ.


❍



Scanned with CamScanner